# Shri Vrindavana Stotram 2

# શ્રીવૃન્દાવનસ્તોત્રમ્ ૨

## Document Information

Text title : Shri Vrindavana Stotram 2 06 14

File name : vRRindAvanastotram2.itx

Category : vishhnu, stotra, shrIkRiShNalIlAshukamuni

Location : doc_vishhnu

Author : Shrikrishnalilashukamahakavimuni

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-14

Latest update : September 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીવૃન્દાવનસ્તોત્રમ્ ૨

વાઞ્છિતાય ભવતાં વિજૃમ્ભતાં
    મત્તહસ્તિવદનં મહન્મહઃ ।
લાઞ્છિતં લલિતભૃઙ્ગસુન્દરી-
    લેખયા ચ શશિલેખયા ચ યત્ ॥ ૧॥

દેવી સરસ્વતી સ્વૈરં સેવાવસરકાઙ્ક્ષિણી ।
દેવદેવમિયં ધન્યા સેવતાં દેવકીસુતમ્ ॥ ૨॥

અસ્તિ વૃન્દાવનં નામ વનં ભુવનપાવનમ્ ।
વૃન્દયા નશ્ચન સૂનોશ્ચ કૃપયા પરિરક્ષિતમ્ ॥ ૩॥ (નશ્ચન્દ)

યત્ર ગાવશ્ચ ગોપાશ્ચ ગોપ્યશ્ચ તરવશ્ચ તમ્ ।
અવતીર્ણાઃ સહ સ્વર્ગાત્ સેવન્તે સ્મ જગત્પ્રભુમ્ ॥ ૪॥

યત્ર રામશ્ચ કૃષ્ણશ્ચ રેમાતે બાલલીલયા ।
નિરન્તરપરીરમ્ભનિર્ભરોઽદ્ભુતહર્ષયા ॥ ૫॥

યત્ર દૃષ્ટ્વા વિષાસ્પૃષ્ટં કદમ્બમમૃતોક્ષિતમ્ ।
સ્પૃષ્ટ્વા કૃષ્ણેન નિર્ભીભ્યાં પદ્ભયાં પેદે ફણિવ્રદે ॥ ૬॥ (ફણિહ્રદે)

યત્ર કાલિયનાગસ્ય મધ્યમં ભુવનોત્તમમ્ ।
ફણં ચકાર ભગવાન્ પાદામ્બુરુહલીલયા ॥ ૭॥

યત્ર દ્વાદશ માર્તાણ્ડા શીતાર્તં કાલિયં હૃદે ।
કૃષ્ણં ક્ષણમુપસ્પૃશ્ય કરૈર્જગ્મુઃ કૃતાર્થતામ્ ॥ ૮॥

યત્ર દ્વાદશ માર્તાણ્ડાઃ પ્રતાપં વીક્ષ્ય શાઙ્ગિણઃ ।
તત્ક્ષણાનિવ કાન્તઃ સેવન્તેઽદ્યાપિ તૈઃ કરૈઃ ॥ ૯॥

યત્ર ગોપીસહસ્રેણ ખેલમાનં સહસ્રશઃ ।
પ્રેક્ષ્ય દેવં સહસ્રાક્ષઃ સહસ્રાક્ષફલં યયૌ ॥ ૧૦॥

યત્ર ત્રિભુવનાભોગસુભગાં તનુમુદ્વહન્ ।
ધન્યૈરન્યાપિ ગોવિન્દા લોચનૈઃ પરિચુમ્બ્યતે ॥ ૧૧॥

યત્ર કેશિનમાક્રમ્ય વામપાદેન કેશવઃ ।
વામહસ્તેન ચાકૃષ્ટૈઃ પ્રાણૈરન્યાપિ ખલતિ ॥ ૧૨॥

ઇતિ યત્ર વિચિત્રાણાં વિષ્ણોર્બાલ્યમુપેયુષઃ ।
પવિત્રાણિ ચરિત્રાણિ ગીયન્તે મુનિપુઙ્ગવૈઃ ॥ ૧૩॥

યત્રોદ્ગીતં ગોપિકાનાં હિમાદ્રેઃ ।
શ્રુત્વા શમ્ભુર્ધ્યાનભઙ્ગાનુપેત્ય ।
ગુપ્તસ્તૃપ્તં કૃષ્ણમીશિષ્ટદીર્ઘં
શ◌ૃણ્વન્ ગીતં ભાતિ ગોપીશ્વરાખ્યઃ ॥ ૧૪॥

કિમત્ર બહુનોક્તેન નિઃશ્રેયસવિધિઃ સ્વયમ્ ।
નિઃશ્રેયસવનં ગત્વા યત્ર રેભે રભાસખઃ ॥ ૧૫॥

તદેતદમૃતસ્યન્દિ બુન્દાવનમહો દૃશોઃ ।
ચિરોત્કન્દિતમાગમ્ય જન્મનઃ ફલમાપ્નુમઃ ॥ ૧૬॥

વન્દે વનમિદં મૂર્ધ્ના યત્ર ચિત્રં જગત્પ્રભોઃ ।
પ્રાપ્ય પ્રતિપદં રેજે સ્થલપદ્મપદં પદમ્ ॥ ૧૭॥

અપિ વા ભુવનોલ્લઙ્ગિસૌભાગ્યં વીક્ષ્ય ચક્રિણા ।
પાદમુદ્રાપદેશેન યચ્ચક્રેણાત્મસાત્કૃતમ્ ॥ ૧૮॥

જગજ્જન્મસ્થિતિલયા લીલા યસ્ય જગત્પ્રભોઃ ।
તસ્યાસ્ય કૃષ્ણદેવસ્ય લીલોદ્યાનમિદં કિયત્ ॥ ૧૯॥

વૃન્દાદેવ્યા બદ્ધરક્ષં તદેતત્
વૃન્દારણ્યં પુણ્યભાજો ભજન્તે ।
ગોપીરૂપૈર્યત્ર લક્ષ્મીસહસ્રૈઃ
દેવઃ સ્વૈરં સેવિતો દૈવતૈશ્ચ ॥ ૨૦॥

વન્દે ભગવતીં વૃન્દાં વનસ્યૈતસ્ય રક્ષિણીમ્ ।
યત્ર દત્તકહરઃ સ્વૈરં ચિક્રીડતિ જગત્પ્રભુઃ ॥ ૨૧॥

વન્દે વૃન્દાવનેન્દ્રસ્ય વિશ્વનાથસ્ય શૈશવમ્ ।
વૈભવોદ્ગન્ધિમઙ્ગલ્યકટાક્ષોક્ષિતદિઙ્મુખમ્ ॥ ૨૨॥

વન્દે કન્દર્પસામ્રજ્યવૃન્દાવનવનેચરમ્ ।
વૃન્દૈરિન્દીવરાક્ષીણાં વન્દિતં તમિતસ્તતઃ ॥ ૨૩॥

તાવકં ભગવન્ ભાતુ તત્ત્વમસ્તમિતોપમમ્ ।
નિસ્તરઙ્ગનિરાતઙ્કનીરન્ધ્રસુખસઙ્કુલમ્ ॥ ૨૪॥

ભગવાન્ પુણ્ડરીકાક્ષો ભાસતાં મમ માનસે ।
મૃગલાઞ્છનવંશસ્ય મણિલાઞ્છનતાં ગતઃ ॥ ૨૫॥

મધુરાભિજનં ધામ મધુરાધરપલ્લવમ્ ।
હૃદયઙ્ગસમભ્યેતુ હૃદયં ગલિતોપમમ્ ॥ ૨૬॥

દેવકીવસુદેવાભ્યાં દત્ત્વા નેત્રોત્સવં સકૃત્ ।
દદૌ નન્દયશોદાભ્યાં યત્તત્પુત્રોત્સવોત્સવાન્ ॥ ૨૭॥

તદેતદવલિભ્યાદૌ બાલલીલાઃ સહસ્રશઃ । (તદેતદવલમ્બ્યાદૌ)
અનુચુમ્બિતકૈશોરકેલિઃ ખેલતુ મે હૃદિ ॥ ૨૮॥

દેવઃ ક્રીડન્ ગોપગોપીસહસ્રૈઃ દત્તાસ્થાને ગોસહસ્રઃ પરીતઃ ।
ક્લૃપ્તચ્છાયઃ કલ્પકશ્રીસહસ્રૈર્ગાયન વેણું ગાહતાં માનસં મે ॥ ૨૯॥

વૃન્દારણ્યે પણ્યગોપાઙ્ગનાભિઃ કલેકૂલે ક્લૃપ્તહર્મ્યે લતાભિઃ ।
ક્રીડન્ કૃષ્ણઃ કૃષ્ણયા બદ્ધદૂરં વીચીહસ્તૈર્ભાતુ બદ્ધાઞ્જલિર્મે ॥ ૩૦॥

અવિશઙ્કમનઙ્ગસઙ્કુલાભિર્વનિતાભિર્વિનતાભિરાત્તરાસઃ ।
કમલારમણઃ કિશોરવેષં પરિપુષ્યન્ મમ ચિત્તમભ્યુદેતુ ॥ ૩૧॥

મધ્યે મધ્યે કુષ્ણમાણિઃ મિશ્રા ભાલા કાચિદ્વલ્લવીનાં સહસ્રૈઃ । (કુષ્ણમાણિક્ય)
ચિત્તાભોગૈર્ભાગિનાં ધન્યધન્યૈર્જીયાદેષા દીર્ઘમાઘ્રાયમણા ॥ ૩૨॥

વ્યોમાભોગે વિસ્મયાવિષ્ટનેત્રૈઃ સાર્થૈર્દિવ્યૈર્નિર્નિમેષં નિષેવ્યમ્ ।
ગોપીલક્ષૈઃ ક્લપ્તરાસં સમન્તાદ્ ગોપં કશ્ચિત્પઞ્ચબાણોઽપ્યુપાસ્તે ॥ ૩૩॥

ચપલં ભવતુ ચરિત્રમેતત્ કમલાકેલિભુજાર્તરે નિલીના । (ભુજાન્તરે)
મુનયશ્ચ મુહુર્મુહુર્મુરારે વિહરન્તે તવ ચાપલં ગૃણન્તઃ ॥ ૩૪॥

મદાન્ધગોપીજનવલ્લભાય નમોઽસ્તુ નારાયણચાપલાય ।
યદ્વીક્ષ્ય લક્ષ્મીર્ભુજમધ્યલીના હા હન્ત લીલાવસરપ્રતીક્ષા ॥ ૩૫॥

ત્વયિ દેવ દયામ્બુધે મુરારે નિખિલં ન્યસ્ય ભરં ? ? ગતાન્ધ્ય ।
વિહરાણિ વિજૃમ્ભમાણતત્વચ્ચરણામ્ભોરુહચુમ્બનોત્સવેન ॥ ૩૬॥

નન્દપ્રજાભરણ નીલમણિપ્રવાળ નાથ ત્વદીયચરણામ્બુજચુમ્બનાન્ધઃ ।
પુણ્યૈઃ પુરા પરિણતૈઃ પરિરસ્યમાનૈર્ભૂયો ભવેય ભગવન્ ભુવનાન્તરેઽપિ ॥ ૩૭॥

જીયાજગત્ત્રયીકાન્ત કૃપાર્ણવ જયાર્ણવ ।
જિગ્યે ફણિફણા યેન પાદેન ચ કરેણ ચ ॥ ૩૮॥

ન કેવલં ભવાન્ દેવ પોતો નન્દયશોદયોઃ ।
કિન્તુ સિન્ધુમમું ઘોરમુત્તરીતું ચ માદૃશામ્ ॥ ૩૯॥

ભુવનેશ્વરમાલમ્બે તન્ત્વાં વૃન્દાવનેશ્વરમ્ ।
સ્મરતામમૃતોદ્ગારિકૈશોરકદયાદ્ભુદુતમ્ ॥ ૪૦॥

વૃન્દારણ્યે વીરગોપાલબાલં વારં વારં વારિતોદાન્તદૈત્યમ્ ।
નાગાંલ્લોકાન્નિષ્પતત્તુષ્પવીચીધારાવર્ષસ્મેરમૌલિં સ્મરામઃ ॥ ૪૧॥

ભજતાં હૃદયામ્ભોજભાગધેયમુપાસ્મહે ।
યજતામધિદૈવં યદ્યચ્ચ બ્રજભૃગીદૃશામ્ ॥ ૪૨॥

પઙ્કેરુહપ્રતિભટં પદપલ્લવેન પારઙ્ગતં ત્રિભુવનાદ્ભુતવિભ્રમાણામ્ ।
પિઞ્છાવતંસપરિલાઞ્છિતકેશહસ્તં પીતામ્બરં કિમપિ ધામ વયં ભજામઃ ॥ ૪૩॥

યશોદાયા યશઃપુઞ્જમઞ્જનાભમુપાસ્મહે ।
વિસ્મયં યત્ર વિન્દન્તિ વૃન્દાવનમૃગા અપિ ॥ ૪૪॥

વૃન્દાવનચરં દેવં વૃન્દાદૃતપદામ્બુજમ્ ।
નન્દાત્મજમુપાસીના નન્દામ શરદઃશતમ્ ॥ ૪૫॥

ન હન્ત તપસા સિદ્ધા ન ચ મુગ્ધાઃ પ્રજાઙ્ગનાઃ । (વ્રજાઙ્ગનાઃ)
તદિહ ત્વદ્દૃશોઃ પાત્રં ભવિતું દેવ કે વયમ્ ॥ ૪૬॥

પશ્યેમ તવ વિશ્વેશ વૃન્દાવનવિહારિણઃ ।
વૈભવં શૈશવોદ્ગન્ધિસિન્ધુકન્યારતનાદૃતમ્ ॥ ૪૭॥

કસ્તૂરિકાકર્બુરકણ્ઠકાણ્ડં કઞ્ચિત્કિશોરં કમલાયતાક્ષમ્ ।
વિસ્તારિણીભિઃ સ્મિતચન્દ્રિકાભિર્વિલોચનં લોચનયોર્વહામઃ ॥ ૪૮॥

ગોગોપીગોપલક્ષૈઃ પરિવૃતમભિતઃ કલ્પકચ્છાયશીતં
    ગીતં વંશ્યા દુહાનં ત્રિદશપુરમહાપુષ્પવૃષ્ટિપ્રહૃષ્ટમ્ ।
ઊર્ધ્વાધસ્તિર્યગાશામખશતભરિતૈર્ભાગ્યભાજાં પરાર્ધૈઃ

દૈવં લેલિહ્યમાનં ત્રિભુવનવિજયં દીપ્યતાં નેત્રયોમે ॥ ૪૯॥

ચપલા સફલા મમાસ્તુ દૃષ્ટિ શ્ચતુરં વીક્ષ્ય ચતુર્ભુજસ્ય બાલ્યમ્ ।
અધરામૃતવાહિવેણુનાદૈ રધિવૃન્દાવનમિન્દિરાવલેહ્યમ્ ॥ ૫૦॥

ઇન્દીવરદલશ્યામમિન્દિરાનયનોત્સવમ્ ।
વૃન્દાવનચરં બાલં વન્દેમહિ કથં દૃશામ્ ॥ ૫૧॥

મન્દસ્મિતામૃતાર્દ્રેણ વદનેન મનોહરમ્ ।
કન્દર્પતાતકૈશોરં કદા મમ દૃશોઃ પદમ્ ॥ ૫૨॥

નન બજાઙ્ગનાલક્ષનયનોત્સવનિઃસિતમ્ । (નત)
કન્દર્પતાતસૌભાગ્યં કદા મમ દૃશા સ્પૃશે ॥ ૫૩॥

સાધારણપદાતીતરાધારણરસાદૃતઃ ।
નારાયણભવન્બાલ્યપારયણપરે દશૌ ॥ ૫૪॥

કદા નુ કમલાબન્ધો વૃન્દાવનદિલાસિનઃ ।
વિલાસિ બદનામ્ભોજં વિલહ્ય સફલે દૃશૌ ॥ ૫૫॥ (વિલોક્ય સફલે)

સફલે ચપલે કૃષ્ણ કદા તવ મદાલસમ્ ।
વદનામ્બુરુહં બુન્દાવનેઽપ્યાચુમ્બ્ય ગદૃશૌઃ ॥ ૫૬॥

વૃન્દાવને વિહરતસ્તવ દિવ્યવેષં
  દૃગ્ભ્યાં નિપાતુમતિલમ્પટયોર્દૃશોર્મે ।
યાવત્પ્રશસ્યસિ જગત્ત્રયકાન્ત કૃષ્ણ
  તાવત્તવાનુચરણં ચરણે કરોમિ ॥ ૫૭॥

ત્વત્પાદપઙ્કજરજઃપરિચારકસ્ય કિન્નામ
  કિઙ્કરજનસ્ય જગત્યસાધ્યમ્ ।
દિવ્યાં દૃશં દિશ યયા કિલ દિવ્યવેષં ત
  અન્તર્બહિસ્તવ વિલય ભવન્તિ ધન્યાઃ ॥ ૫૮॥

યદ્વા ચિત્તપથે વિચિન્ત્ય ભવતો ભક્તૈકચિન્તામણે
  ભાવં ભાવનયા કયાપિ ભગવન્ પ્રાપ્સ્યામ્યભીપ્સાસ્પદમ્ ।
કિં વા કેવલયા તવૈવ કૃપયા હે કૃષ્ણ કૃષ્ણાસખ
  સ્વામિન્ કામદુઘૈઃ કટાક્ષવિભવૈઃ સાર્ધં લભે લિપ્સિતમ્ ॥ ૫૯॥

વૃન્દાવનવ્યસનિનસ્તવ દેવ કૃષ્ણ

લીલાશુકેન રચિત નિચિતં રસૌઘૈઃ ।
પ્રત્યક્ષરં પરિદુહન્મધુકર્ણયોસ્તે
સ્તોત્રં તદેતદનિશં વિલિહન્તુ ધન્યા ॥ ૬૦॥

ઇતિ શ્રીકૃષ્ણલીલાશુકમહાકવિમુનિવિરચિન્તં ષષ્ટિસઙ્ખયં
સ્તોત્રરત્નસોદરન્નામ વૃન્દાવનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Gopalakrishnan

---

*Shri Vrindavana Stotram 2*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*